# Shri Dakshinasyabhujangaprayatastutih

# શ્રીદક્ષિણાસ્યભુજઙ્ગપ્રયાતસ્તુતિઃ

## Document Information

Text title : dakShiNAsyabhujangaprayAtastutiH

File name : dakShiNAsyabhujangaprayAtastutiH.itx

Category : shiva, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, bhujanga

Location : doc_shiva

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીદક્ષિણાસ્યભુજઙ્ગપ્રયાતસ્તુતિઃ

ભવામ્ભોધિપારે નયન્તં સ્વભક્તાન્
    કૃપાપૂરપૂર્ણૈરપાઙ્ગૈઃ સ્વકીયૈઃ ।
સમસ્તાગમાન્તપ્રગીતાપદાનં
    સદા દક્ષિણાસ્યં તમારાધયેઽહમ્ ॥ ૧॥

ચતુર્વિંશદર્ણસ્ય મન્ત્રોત્તમસ્ય
    પ્રજાપાદ્દૃઢં વશ્યભાવં સમેત્ય ।
પ્રયચ્છત્યરં યશ્ચ વિદ્યામમોઘાં
    સદા દક્ષિણાસ્યં તમારાધયેઽહમ્ ॥ ૨॥

જડાયાપિ વિદ્યાં પ્રયચ્છન્તમાશુ
    પ્રપન્નાર્તિવિધ્વંસદક્ષાભિધાનમ્ ।
જરાજન્મમૃત્યૂન્હરન્તં પ્રમોદાત્
    સદા દક્ષિણાસ્યં તમારાધયેઽહમ્ ॥ ૩॥

યમારાધ્ય પદ્માક્ષપદ્મોદ્ભવાદ્યાઃ
    સુરાગ્ર્યાઃ સ્વકાર્યેષુ શક્તા બભૂવુઃ ।
રમાભારતીપાર્વતીસ્તૂયમાનં
    સદા દક્ષિણાસ્યં તમારાધયેઽહમ્ ॥ ૪॥

સુધાસૂતિબાલોલ્લસન્મૌલિભાગં
    સુધાકુમ્ભમાલાલસત્પાણિપદ્મમ્ ।
સપુત્રં સદારં સશિષ્યં સવાહં
    સદા દક્ષિણાસ્યં તમારાધયેઽહમ્ ॥ ૫॥

ગજાસ્યાગ્નિભૂસેવ્યપાદારવિન્દં
    ગજાશ્વાદિસમ્પત્તિહેતુપ્રણામમ્ ।
નિજાનન્દવારાશિરાકાસુધાંશું
    શુચીન્દ્વર્કનેત્રં ભજે દક્ષિણાસ્યમ્ ॥ ૬॥

ગુણાન્ષટ્શમાદીનિહામુત્ર ભોગે
    વિરક્તિં વિવેકં ધ્રુવાનિત્યયોશ્ચ ।
મુમુક્ષાં ચ શીઘ્રં લભેત પ્રસાદા-
    ત્તમાનન્દકન્દં ભજે દક્ષિણાસ્યમ્ ॥ ૭॥

જડો જન્મમૂકોઽપિ યન્મન્ત્રજપ્તુઃ
    કરસ્પર્શનાત્સ્યાત્સુરાચાર્યતુલ્યઃ ।
તમજ્ઞાનવારાન્નિધેર્બાડવાગ્નિં
    મુદા સર્વકાલં ભજે દક્ષિણાસ્યમ્ ॥ ૮॥

જહૌ મૃત્યુભીતિં યદીયાઙ્ઘ્રિપદ્મં
    સદા પૂજયિત્વા મૃકણ્ડોસ્તનૂજઃ ।
તમદ્રીન્દ્રકન્યાસમાશ્લિષ્ટદેહં
    કૃપાવારિરાશિં ભજે દક્ષિણાસ્યમ્ ॥ ૯॥

પુરા કામયાના પતિં સ્વાનુરૂપાં
    ચરિત્વા તપો દુષ્કરં શૈલકન્યા ।
અવાપાદરાદ્યા રુચા કામગર્વં
    હરન્તં તમન્તર્ભજે દક્ષિણાસ્યમ્ ॥ ૧૦॥

યદીયાઙ્ઘ્રિસેવાપરાણાં નરાણાં
    સુસાધ્યા ભવેયુર્જવાત્સર્વયોગાઃ ।
હઠાદ્યાઃ શિવાન્તા યમાદ્યઙ્ગયુક્તા
    મુદા સન્તતં તં ભજે દક્ષિણાસ્યમ્ ॥ ૧૧॥

વટાગસ્ય મૂલે વસન્તં સુરસ્ત્રી-
    કદમ્બૈઃ સદા સેવ્યમાનં પ્રમોદાત્ ।
વરાન્ કામિતાન્નમ્રપઙ્ક્ત્યૈ દિશન્તં
    દયાજન્મભૂમિં ભજે દક્ષિણાસ્યમ્ ॥ ૧૨॥

વિધૂતાભિમાનૈસ્તનૌ ચક્ષુરાદા-
    વહન્ત્વેન સમ્પ્રાપ્યમેકાગ્રચિત્તૈઃ ।
યતીન્દ્રૈર્ગુરુશ્રેષ્ઠવિજ્ઞાતતત્ત્વૈ-
    ર્મહાવાક્યગૂઢં ભજે દક્ષિણાસ્યમ્ ॥ ૧૩॥

શુકાદ્યા મુનીન્દ્રા વિરક્તાગ્રગણ્યાઃ

સમારાધ્ય યં બ્રહ્મવિદ્યામવાપુઃ ।
તમલ્પાર્ચનાતુષ્ટચેતોઽમ્બુજાતં
ચિદાનન્દરૂપં ભજે દક્ષિણાસ્યમ્ ॥ ૧૪॥

શ્રુતેર્યુક્તિતશ્ચિન્તનાદ્ધ્યાનયોગા-
દ્ભવેદ્યસ્ય સાક્ષાત્કૃતિઃ પુણ્યભાજામ્ ।
અખણ્ડં સદાનન્દચિદ્રૂપમન્તઃ
સદાહં મુદા તં ભજે દક્ષિણાસ્યમ્ ॥ ૧૫॥

સુવર્ણાદ્રિચાપં રમાનાથબાણં
દિનેશેન્દુચક્રં ધરાસ્યન્દનાગ્ર્યમ્ ।
વિધિં સારથિં નાગનાથં ચ મૌર્વીં
પ્રકુર્વાણમીશં ભજે દક્ષિણાસ્યમ્ ॥ ૧૬॥

કરામ્ભોરુહૈઃ પુસ્તકં બોધમુદ્રાં
સુધાપૂર્ણકુમ્ભં સ્રજં મૌક્તિકાનામ્ ।
દધાનં ધરાધીશમૌલૌ શયાનં
શશાઙ્કાર્ધચૂડં ભજે દક્ષિણાસ્યમ્ ॥ ૧૭॥

કલાદાનદક્ષં તુલાશૂન્યવક્ત્રં
શિલાદાત્મજેડ્યં વલારાતિપૂજ્યમ્ ।
જલાદ્યષ્ટમૂર્તિં કલાલાપયુક્તં
ફલાલિં દિશન્તં ભજે દક્ષિણાસ્યમ્ ॥ ૧૮॥

યદાલોકમાત્રાન્નતાનાં હૃદબ્જે
શમાદ્યા ગુણાઃ સત્વરં સમ્ભવન્તિ ।
પ્રણમ્રાલિચેતઃસરોજાતભાનું
ગુરું તં સુરેડ્યં નમામો ભજામઃ ॥ ૧૯॥

પિનદ્ધાનિ ભક્ત્યાખ્યસૂત્રેણ કણ્ઠે
સદેમાનિ રત્નાનિ ધત્તે દૃઢં યઃ ।
મુદા મુક્તિકાન્તા દ્રુતં તં વૃણીતે
સ્વયં શાન્તિદાન્તિપ્રમુખ્યાલિયુક્તા ॥ ૨૦॥

ઇતિ શ‍ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતા શ્રીદક્ષિણાસ્યભુજઙ્ગપ્રયાતસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by PSA Easwaran

*Shri Dakshinasyabhujangaprayatastutih*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*